जलधिः, पुं, (जलानि धीयन्तेऽस्मिन्निति। जल+धा+"कर्म्मण्यधिकरणे च।" ३।३।९३। इति किः।) समुद्रः। (यथा, आर्य्यासप्तशत्याम्। ४८०।
"या दक्षिणा त्वमस्यामदक्षिणो दक्षिणस्त्वमितरस्याम्।
जलधिरिव मध्यसंस्थो न वेलयोः सदृग्माचरसि॥")
दशशङ्कुसंख्या। सा तु शतलक्षकोटयः। इति लीलावती॥

जलधिगा, स्त्री, (जलधिं समुद्रं गच्छतीति। गम+डः। स्त्रियां टाप्।) नदी। इति हेमचन्द्रः। ४।१४९॥

जलधिजा, स्त्री, (जलधौ जायते इति। जन्+"सप्तम्यां जनेर्ड़ः।" इति डः।) लक्ष्मीः। इति त्रिकाण्डशेषः॥

जलधेनुः, स्त्री, (जलकल्पिता धेनुः।) दानार्थकल्पितधेनुः। यथा,—
होतोवाच।
"जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्ब्बकम्।
गोचर्म्ममात्रं भूभागं गोमयेनोपलेपयेत्॥
तत्र मध्ये च राजेन्द्र! पूर्णकुम्भन्तु विन्यसेत्।
जलपूर्णसुगन्धाढ्यं कर्पूरागुरुचन्दनैः॥
वासितां गन्धतोयेन तां धेनुं परिकल्पयेत्।
वत्सं तथापरं कल्प्यं घृतेन परिपूरितम्॥
वर्द्धनीकं महाराज! पत्रपुष्पैः समन्वितम्।
दूर्व्वाङ्कुरैरुपस्तीर्य्य स्रग्दामैश्च विभूषितम्॥
पञ्चरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप!।
मांसीमुशीरं कुष्ठञ्च तथा शैलेयवालुकम्॥
आमलासर्षपाश्चैताः सर्व्वधान्यानि पार्थिव!।
चतुर्द्दिक्षुपि पत्राणि चत्वार्य्येव प्रकल्पयेत्॥
एवं घृतमयं पात्रं द्वितीयं दधिपूरितम्।
तृतीयं मधुनश्चैव चतुर्थं शर्क्कराहृतम्॥
सुवर्णं मुखचञ्चूषि शृङ्गं कृष्णागुरूणि च।
प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम्॥
ताम्रपृष्ठां कांस्यदोहां दर्भरोमसमन्विताम्।
पुच्छं सूत्रमयं कृत्वा कृष्णाभरणघण्टिकाम्॥
कम्बले पुष्पमालाञ्च गुड़ास्यां शुक्तिदन्तिकाम्।
जिह्वां शर्क्करया कृत्वा नवनीतेन च स्तनम्॥
इक्षुपादान्तु राजेन्द्र! गन्धपुष्पोपशोभिताम्।
कृष्णाजिनोपरि स्थाप्य वस्त्रेराच्छादितान्तु ताम्॥
गन्धपुष्पैः समभ्यर्च्य विप्राय विनिवेदयेत्।
एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे॥
साधुविप्राय राजेन्द्र! श्रोत्रियायाहिताग्नये।
तपोवृद्धे वयोवृद्धे दातव्या च कुटुम्बिने॥
यो ददाति नरो राजन्! यः पश्यति शृणोति च।
प्रतिगृह्णाति यो विप्रः सर्व्वे मुच्यन्ति पातकात्॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोकं स गच्छति॥
योऽश्वमेधेन यजते समाप्तवरदक्षिणः।
जलधेनुञ्च यो दद्यात् सममेतन्नराधिपः॥
जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः।
अथवा त्वेकदिने यः पयोव्रतमास्थितः॥
ग्राहकोऽपि चिराचं वै तिष्ठेदेवं न संशयः।
यत्र क्षीरवहा नद्यो मधुपायसकर्द्दमाः॥
यत्र चाप्सरसां गीतं तत्र यान्ति जलप्रदाः।
दाता च दापकश्चैव प्रतिग्राही च यो द्विजः॥
ते सर्व्वे पापनिर्म्मुक्ता विष्णुलोकञ्च प्राप्नुयुः॥"
इति वाराहे जलधेनुमाहात्म्यनामाध्यायः॥

जलनकुलः, पुं, (जले नकुल इव।) जलजन्तुविशेषः। धाड़िया इति उद्‌विड़ाल इति च भाषा। तत्पर्य्यायः। उद्रः २ जलमार्जारः ३ जलाखुः ४ जलप्लवः ५। इति त्रिकाण्डशेषः। जलविड़ालः ६ नीराखुः ७। इति हारावली। ।७६। पानीयनकुलः ८ वसी ९। इति हेमचन्द्रः॥

जलनिधिः, पुं, (जलानि निधीयन्तेऽस्मिन्निति। धा+"कर्म्मण्यधिकरणे च।" ३।३।९३। इति किः। जलानां निधिरिति वा।) समुद्रः। इत्यमरः। १।१०।२०॥ (यथा, आर्य्याशप्तशत्याम्। ६१४।
"सरित इव यस्य गेहे शुष्यन्ति
विशालगोत्रजा नार्य्यः।
क्षाराब्धिः स लघ्यति जलनिधिलहरीषु
जलद इव॥"
चतुः संख्या समुद्रवाचित्वात्। यथा, सतृह्लत्तमुक्तावल्याम्।
"वारे शीतकरे तिथौ जलनिधिं
भैऽश्विन्ये योगे ध्रुवम्॥" इति॥)

जलनिर्गमः, पुं, (गम+"ग्रहवृदृनिश्चिगमश्च।" ३।३।५८। इति भावे अप्। जलानां निर्गमो वहिर्गमनं यस्मात्।) प्राकारगृहभित्त्यादिषु जलनिःसरणमार्गः। इति भरतः॥ देवकुलप्राकारादिषु जलनिःसरणद्वारम्। इति सर्व्वानन्दः॥ तत्पर्य्यायः। भ्रमः २। इत्यमरः। २।२।१०।७॥ वक्रम् ३ पुटभेदः ४। इति स्वामी॥

जलनीली, स्त्री, (जलं नीलयतीति। नील+तत् करोतीति णिच्+ततः "कर्म्मण्यण्।"३।२।१। इत्यण्। ततो ङीष्।) शैवालम्। इत्यमरः। १।१०।३८॥ (शैवालशब्देऽस्या विवृतिर्द्रष्टव्या॥)

जलन्धरः, पुं, (जलं ब्रह्मनेत्रच्युताश्रुजलं धरतीति। जल+धृ+बाहुलकात् खच् मुम् च।) असुरविशेषः। तस्योत्पत्तिकारणं यथा,—
इन्द्रः शिवं द्रष्टुं शिवलोकं गत्वा एकं भयानकं पुरुषं दृष्ट्वा तं पुनःपुनः पप्रच्छ ईश्वरः क गतः। स उत्तरं न ददौ इन्द्रः क्रुद्धस्तं वज्रेण जघान। ततो रुद्रस्तेजसा प्रजज्वाल। तत इन्द्रो भीतस्तं प्रणम्य तुष्टाव रुद्रस्तुष्ट इन्द्रदाहार्य्योत्पन्नं भालनेत्रस्यवह्निं गृहीत्वा गङ्गासागरसङ्गमे प्राक्षिपत् ततः स बालरूपो भूत्वा रुरोद तस्य रोदनशब्देन सप्तलोका बधिरीकृतास्तच्छ्रुत्वा ब्रह्मा विस्मितस्तत्रागत्य तं बालं समुद्रक्रोड़े दृष्ट्वा तं पप्रच्छ कस्यायं पुत्रः समुद्रस्तं प्रणम्योवाच मम पुत्रः अस्य जातकर्म्मादि कुरु इत्युक्त्वा ब्रह्मा क्रोड़े ददौ स बालस्तस्य श्मश्रु दधार श्मश्रु धुन्वतो ब्रह्मणो नेत्राभ्यां जलमगमत् ब्रह्मा समुद्रमुवाच यस्मादनेन मम नेत्राभ्यां निर्गतं जलं धृतं तस्मादयं जलन्धरनामा अधुनैव सर्व्वशास्त्रवेत्ता रुद्रं विना सर्व्वभूतावध्यश्च भविष्यति इत्युक्त्वा शुक्रमाहूय तमासुरराज्ये न्यवेशयत् स कालनेमिसुतां वृन्दामुपयेमे। इति पाद्मोत्तरखण्डम्॥

जलपतिः, पुं, (जलस्य पतिः।) वरुणः। इति हेमचन्द्रः। २।१०२॥ (अस्य जलपतित्वकथा यथा, काशीखण्डे। १२। ८९—९५।
"ततस्तं तनयः दृष्ट्वा पितरं प्रणिपत्य च।
जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम्॥
तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम्।
पञ्चवर्षसहस्राणि स्थितः पाषाणनिश्चलः॥
आविरासीन्महादेवस्तुष्टस्तत्तपसा ततः।
उवाच कार्द्दमे! ब्रूहि कं ददामि वरोत्तमम्॥
कार्द्दमिरुवाच।
यदि नाथ! प्रसन्नोऽसि भक्तानामनुकम्पक!।
सर्व्वासामाधिपत्यं मे देह्यपां यादसामपि॥
इति श्रुत्वा महेशानः सर्व्वचिन्तितदः प्रभुः।
अभ्यषिञ्चत् तं तत्र वारुणे परमे पदे॥
रत्नानामब्धिजातानामब्धीनां सरितामपि।
सरसां पल्वलानाञ्च वाप्यम्बुस्रोतसां पुनः॥
जलाशयानां सर्व्वेषां प्रतीच्याश्चापि वै दिशः।
अधीश्वरः पाशपाणिर्भव सर्व्वामरप्रियः॥")
समुद्रः। अप्पतित्वमरदर्शनात्॥

जलपारावतः, पुं, (जले पारावत इव।) पक्षिविशेषः। तत्पर्य्यायः। कोपी २ जलकपोतः ३। इति राजनिर्घण्टः॥

जलपित्तं, क्ली, (जलानां पित्तमिव।) अग्निः। इति शब्दरत्नावली॥

जलपिप्पली, स्त्री, (जलजाता पिप्पली।) पिप्पलीविशेषः। पनिसगा इति लोके। जलपिपरी इति हिन्दी भाषा। तत्पर्य्यायः। मत्स्याद्नी २ शारदी ३ तोयवल्लरी ४ मत्स्यादनी ५ मत्स्यगन्धा ६ लाङ्गली ७ शकुलादनी ८ अग्निज्वाला ९ चित्रपत्री १० प्राणदा ११ तृणशीता १२ बहुशिखा १३। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। व्रणकीटादिदोषरक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"जलपिप्पल्यभिहिता शारदी शकुलादनी।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता॥
जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः।
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा॥
कटुपाका रसा वृष्या कषाया वह्निवर्द्धिनी॥"
इति भावप्रकाशः॥
("गम्भीरो जलपिप्पल्यस्तुसुरः शृङ्गवेरिका।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च॥"
इति चरके सूत्रस्थानेऽन्नविधिऽध्याये॥)